सौर्ग नं ६८

संस्कृत

हगणपतिसहस्रनाम

५८/स्तो. 333

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥श्रीमहागणपतिसहस्रनामस्तोत्रप्रारंभः॥राम॥ छ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

॥ग॰स॰॥ ॥२॥ ॥श्रीगणेशायनमः॥ ॥अथमहागणपतिसहस्रनामस्तोत्रप्रारंभः॥
व्यासउवाच॥ ॥कथंनाम्नांसहस्रंस्वंगणेशउपदिष्टवान्॥ शिवायैत
न्ममाचक्ष्वलोकानुग्रहतत्पर॥१॥ ब्रह्मोवाच॥ देवएवंपुरारातिःपुरत्रय
जयोद्यमे॥ अनर्चनाद्गणेशस्यजातोविघ्नाकुलःकिल॥२॥ मनसासवि
निर्धार्यततस्तद्विघ्नकारणं॥ महागणपतिंभक्त्यासमभ्यर्च्ययथाविधि
॥३॥ विघ्नप्रशमनोपायमपृच्छदपराजितः॥ संतुष्टःपूजयाशंभोर्महागण
पतिःस्वयं॥४॥ सर्वविघ्नैकहरणंसर्वकामफलप्रदं॥ ततस्तस्मैस्वकंनाम्नां ॥ग॰न॰॥ ॥१॥
सहस्रमिदमब्रवीत्॥५॥ अस्यश्रीमहागणपतिसहस्रनामस्तोत्रमंत्रस्य॥
श्रीमहागणपतिर्ऋषिः॥ अनुष्टुप्छंदः॥ श्रीमहागणपतिर्देवता॥ गंबीजं

३

॥ग०स०॥
॥२॥

अवर्णोविकटोविघ्ननायकः ॥ सुमुखोदुर्मुखोबुद्धोविघ्नराजोगजाननः ॥७॥
भीमःप्रमोदआमोदःसुरानंदोमदोत्कटः ॥ हेरंबःशंबरःशंभुर्लंबकर्णोम
हाबलः ॥८॥ नंदनोलंपटोभीरुर्मेघनादोगणंजयः ॥ विनायकोविरूपाक्षो
धीरशूरोवरप्रदः ॥९॥ महागणपतिर्बुद्धिप्रियःक्षिप्रप्रसादनः ॥ रुद्रप्रियो
गणाध्यक्षउमापुत्रोघनाशनः ॥१०॥ कुमारगुरुरीशानपुत्रोमूषकवाहनः ॥
सिद्धिप्रियःसिद्धिपतिःसिद्धःसिद्धिविनायकः ॥११॥ अविघ्नस्तुंबरुःसिं
हवाहनोमोहिनीप्रियः ॥ कटंकटोराजपुत्रःशालकःसंमितोमितः ॥१२॥
कूष्मांडसामसंभूतिर्दुर्जयोधूर्जयोजयः ॥ भूपतिर्भुवनेशानोभूतानांप
तिरव्ययः ॥१३॥ विश्वकर्त्ताविश्वमुखोविश्वरूपोनिधिर्घृणिः ॥ कविःकवीना

॥ग०नं०॥
॥२॥

॥ग०स०॥ लकः॥२१॥ विपश्चिद्दूरसेनाद्दोन्नादभिन्नबलाहकः॥ वराहरदनो मृत्संकजयो
॥३॥ व्याघ्राजिनांबरः॥२२॥ इच्छाशक्तिधरो देवत्राता दैत्यविमर्द्दनः॥ शंभुवक्त्रोद्भ
वः शंभुकोपहा शंभुहास्यभूः॥२३॥ शंभुतेजाः शिवाशोकहारी गौरीसुखा
वहः॥ उमांगमलजो गौरीतेजोभूः स्वर्धुनीभवः॥२४॥ यज्ञकायो महानादो
गिरिवर्ष्माशुभाननः॥ सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः॥२५॥ ब्र
ह्मांडकुंभश्चिद्व्योमभालः सत्यशिरोरुहः॥ जगज्जन्मलयोन्मेषनिमेषो
ग्न्यर्कसोमदृक्॥२६॥ गिरींद्रैकरदो धर्माधर्मोष्ठः सामबृंहितः॥ ग्रहर्क्षदश ॥ग०न०॥
नो वाणीजिह्वो वासवनासिकः॥२७॥ कुलाचलांसः सोमार्कघंटो रुद्रशि ॥३॥
रोधरः॥ नदीनदभुजः सर्पांगुलीकः तारकानखः॥२८॥ भ्रूमध्यसंस्थित

5

॥ग॰स॰॥ नाश्रयः॥ तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः॥३६॥ सविघ्ननाशिनी
॥४॥ पीठः सर्वशक्त्यंबुजाश्रयः॥ लिपिपद्मासनाधारो वन्हिधामत्रयाश्रयः॥३७॥
उन्नतप्रपदो गूढगुल्फः संवृतपार्ष्णिकः॥ पीनजंघः श्लिष्टजानुः स्थूलोरुः
प्रोन्नमत्कटिः॥३८॥ निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः॥ पीनस्कं
धः कंबुकंठो लंबोष्ठो लंबनासिकः॥३९॥ भग्नवामरदस्तुंगसव्यदंतो म
हाहनुः॥ ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः॥४०॥ स्तबकाकारकुंभा
ग्रो रत्नमौलिर्निरंकुशः॥ सर्प्पहारकटीसूत्रः सर्प्पयज्ञोपवीतवान्॥४१॥ स ॥ग॰न॰॥
र्प्पकोटीरकटकः सर्पग्रैवेयकांगदः॥ सर्पकक्षोदराबंधः सर्पराजोत्तरीय ॥४॥
कः॥४२॥ रक्तो रक्तांबरधरो रक्तमाल्यविभूषणः॥ रक्तेक्षणो रक्तकरो रक्तताल्वो

(6)

॥ग॰स॰॥ क्ष्मीप्रियतमः सिद्धिलक्ष्मीमनोरमः ॥ रमारमेशपूर्वांगो दक्षिणोमामहेश्व
॥५॥ रः ॥५१॥ महीवराहवामांगो रतिकंदर्पपश्चिमः ॥ आमोदमोदजननः सप्र
मोदप्रमोदनः ॥५२॥ समेधितसमृद्धिश्रीर्ऋद्धिसिद्धिप्रवर्त्तकः ॥ दत्तसौमु
ख्यसुमुखः कांतिकंदलिताश्रयः ॥५३॥ मदनावत्याश्रितांघ्रिः कृत्तवैमुख्य
दुर्मुखः ॥ विघ्नसंपल्लवोपघ्नसेवोन्निद्रमदद्रवः ॥५४॥ विघ्नकृन्निघ्नचरणो
द्राविणीशक्तिसत्कृतः ॥ तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक् ॥५५॥
मोहिनीमोहनो भोगदायिनीकांतिमंडितः ॥ कामिनीकांतवक्त्रश्रीरधिष्ठि ॥ग॰न॰॥
तवसुंधरः ॥५६॥ वसुंधरामदोन्नद्धमहाशंखनिधिप्रभुः ॥ नमद्वसुमतीमौ ॥५॥
लिमहापद्मनिधिप्रभुः ॥५७॥ सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ॥

7

॥ग०स०॥ ॥६॥

पाशांकुशोंकुंबीजस्त्वंगजशक्तिकः॥६५॥विश्वादिजननत्राणः स्वाहाशक्तिः सकी
लकः॥अमृताब्धिकृतावासोमदघूर्णितलोचनः॥६६॥उच्छिष्टगणउच्छिष्टगण
केशोगणनायकः॥सार्वकालिकसंसिद्धिर्नित्यशैवोदिगंबरः॥६७॥अनपायो
नंतदृष्टिरप्रमेयोजरामरः॥अनाविलोप्रतिरथोह्यच्युतोमृतमक्षरं॥६८॥अप्र
तर्क्योक्षयोऽजय्योनाधारोनामयोमलः॥अमोघसिद्धिरद्वैतमघोरोऽप्रमि
ताननः॥६९॥अनाकारोब्धिभूम्यग्निबलघ्नोव्यक्तलक्षणः॥आधारपीठ
आधारआधाराधेयवर्जितः॥७०॥आखुकेतनआशापूरकआखुमहारथः॥ ॥ग०न०॥
इक्षुसागरमध्यस्थइक्षुभक्षणलालसः॥७१॥इक्षुचापातिरेकश्रीरिक्षुचा ॥६॥
पनिषेवितः॥इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः॥७२॥इंदीवरदलश्याम

॥ ग० स० ॥ ७ ॥

रंमद्रसमोन्मेषऐरावतनिभाननः ॥ ८० ॥ ॐकारवाच्यॐकारओजस्वानो
षधीपतिः । औदार्यनिधिरोद्धत्यधर्यऔन्नत्यनिस्वनः ॥ ८१ ॥ अंकुशः सु
रनागानामंकुशः सुरविद्विषां ॥ अः समस्तविसर्गांतपदेषु परिकीर्त्तितः
॥ ८२ ॥ कमंडलुधरः कल्पः कपर्दी कलभाननः । कर्मसाक्षी कर्मकर्त्ता कर्मा
कर्मफलप्रदः ॥ ८३ ॥ कदंबगोलकाकारः कूष्मांडगणनायकः । कारुण्यदेहः
कपिलः कथकः कटिसूत्रभृत् ॥ ८४ ॥ खर्वः खड्गप्रियः खड्गखांतांतस्थः ख
निर्मलः ॥ खल्वाटशृंगनिलयः खट्वांगी खदुरासदः ॥ ८५ ॥ गुणाढ्यो गह ॥ श्रीव ॥
नो गस्थो गद्यपद्यसुधार्णवः । गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्वजः ॥ ८६ ॥ ७ ॥
गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः ॥ गुहाशयो गुहाब्धिस्थो गुरुग

॥ग॰स॰॥ दक्षयज्ञप्रमथनोदातादानवमोहनः॥दयावान्दिव्यविभवोदंडभृद्दंडना
॥८॥ यकः॥९५॥दंतप्रभिन्नाभ्रमालोदैत्यवारणदारणः॥दंष्ट्रालग्नद्विपघटो
देवार्थनृगजाकृतिः॥९६॥धनधान्यपतिर्धन्योधनदोधरणीधरः॥ध्यानै
कप्रकटोध्येयोध्यानंध्यानपरायणः॥९७॥नंद्यानंदीप्रियोनादोनादम
ध्यप्रतिष्ठितः॥निष्कलोनिर्मलोनित्योनित्यानित्योनिरामयः॥९८॥परंव्यो
मपरंधामपरमात्मापरंपदं॥परात्परःपशुपतिःपशुपाशविमोचकः॥९९॥
पूर्णानंदःपरानंदःपुराणपुरुषोत्तमः॥पद्मप्रसन्ननयनःप्रणताज्ञान ॥राम॥
मोचनः॥१००॥प्रमाणप्रत्ययातीतःप्रणतार्तिनिवारणः॥फलहस्तःफणि ॥८॥
पतिःफेत्कारःफाणितप्रियः॥१॥बाणार्चितांघ्रियुगलोबालकेलिकुतू

10

॥ ग॰ स॰ ॥
॥ ९ ॥

स्यपरोल्लाभहृल्लोकविश्रुतः ॥ वरेण्यो वन्हिवदनो वंद्यो वेदांतगोचरः ॥ वि
कर्त्ता विश्वतःश्चक्षुर्विधाता विश्वतोमुखः ॥ १० ॥ वामदेवो विश्वनेता वज्री
वज्रनिवारणः ॥ विश्वबंधनविष्कंभाधारो विश्वेश्वरप्रियः ॥ ११ ॥ शब्द
ब्रह्मशमप्राप्यः शंभुशक्तिगणेश्वरः ॥ शास्ता शिखाग्रनिलयः शरण्यः
शिखरीश्वरः ॥ १२ ॥ षडृतुकुसुमस्रग्वी षडाधारः षडाक्षरः ॥ संसार
वैद्यः सर्वज्ञः सर्वभेषजभेषजं ॥ १३ ॥ सृष्टिस्थितिलयक्रीडः सुरकुं
जरभेदनः ॥ सिंदूरितमहाकुंभः सदसद्व्यक्तिदायकः ॥ १४ ॥ साक्षी समु ॥ शिव ॥
द्रमथनः स्वसंवेद्यः स्वदक्षिणः ॥ स्वतंत्रः सत्यसंकल्पः सामगानरतः सु ॥ ९ ॥
खी ॥ १५ ॥ हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक् ॥ हव्यो हुतप्रियो

11

॥ग०स०॥ ॥१०॥

राहुर्मंदःकविर्जीवोबुधोभौमःशशीरविः॥कालःसृष्टिःस्थितिर्विश्वंस्था
वरंजंगमंचयत्॥२४॥भूरापोग्निर्मरुद्व्योमाहंकृतिःप्रकृतिःपुमान्॥ब्रह्मा
विष्णुःशिवोरुद्रईशाःशक्तिःसदाशिवः॥२५॥त्रिदशाःपितरःसिद्धाय
क्षारक्षांसिकिन्नराः॥साध्याविद्याधराभूतामनुष्याःपशवःखगाः॥२६॥
समुद्राःसरितःशैलाभूतंभव्यंभवोद्भवः॥सांख्यंपातंजलंयोगःपुराणा
निश्रुतिऽस्मृतिः॥२७॥वेदांगानिसदाचारोमीमांसान्यायविस्तरः॥आ
युर्वेदोधनुर्वेदोगांधर्वंकाव्यनाटकं॥२८॥वैखानसंभागवतंसात्वतंपांच ॥ग०न०॥
रात्रिकंशैवंपाशुपतंकालामुखंभैरवंशासनं॥२९॥शाक्तंवैनायकंसौ ॥१०॥
रंजैनमार्हतसंहिता॥सदसद्व्यक्तमव्यक्तंसचेतनमचेतनं॥३०॥बंधमोक्षः

॥ग॰स॰॥ तालः पंचकरः पंचप्रणवभावितः ॥३८॥ पंचब्रह्ममयस्फूर्त्तिः पंचावरणवा
॥११॥ रितः॥ पंचभक्ष्यप्रियः पंचबाणः पंचशिवात्मकः ॥३९॥ षट्कोणपीठः षट्चक्रधा
माषड्ग्रंथिभेदकः ॥ षडध्वध्वांतविध्वंसी षडंगुलमहाह्रदः ॥४०॥ षण्मुखः
षण्मुखभ्राताषट्शक्तिपरिवारितः ॥ षड्वैरिवर्गविध्वंसीषडूर्मिभयभंज
नः ॥४१॥ षट्तर्कदूरः षट्कर्मनिरतः षड्रसाश्रयः ॥ सप्तपातालचरणः सप्त
द्वीपोरुमंडले ॥४२॥ सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः ॥ सप्तांगराज्य
सुखदः सप्तर्षिगणमंडितः ॥४३॥ सप्तछंदोनिधिः सप्तहोतासप्तस्वराश्र ॥ग॰ना॰॥
यः ॥ सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः ॥४४॥ सप्तछंदोमोदम ॥११॥
दः सप्तछंदोमरवप्रभुः ॥ अष्टमूर्त्तिध्येयमूर्त्तिरष्टप्रकृतिकारणं ॥४५॥ अ

(13)

ग०स० १२

दशांतनिकेतनः॥त्रयोदशाभिदाभिन्नविश्वेदेवाधिदैवतं॥५३॥चतुर्दशेंद्र
वरदश्चतुर्दशमनुप्रभुः॥चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः॥५४॥
सामपंचदशः पंचदशीशीतांशुनिर्मलः॥षोडशाधारनिलयः षोडश
स्वरमातृकः॥५५॥षोडशांतपदावासः षोडशेंदुकलात्मकः॥कलासप्त
दशीसप्तदशासप्तदशाक्षरः॥५६॥अष्टादशद्वीपपतिरष्टादशपुराणकृ
त्॥अष्टादशौषधीसृष्टिरष्टादशविधिस्मृतः॥५७॥अष्टादशलिपिव्य
ष्टिसमष्टिज्ञानकोविदः॥एकविंशः पुमानेकविंशत्यंगुलिपल्लवः॥५८॥ ग०न० १२
चतुर्विंशतितत्वात्मा पंचविंशाख्यपूरुषः॥सप्तविंशतितारेशः सप्तविंशति
योगकृत्॥५९॥द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः॥षट्त्रिंशत्त

15

॥ग॰स॰॥ ॥१३॥ अष्टाशीतिसहस्राद्यमहर्षिस्तोत्रयंत्रितः ॥ लक्षाधीशप्रियाधारोलक्षाधा
रमनोमयः ॥ ६८ ॥ चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ॥ चतुरशीतिलक्षा
णांजीवानांदेहसंस्थितः ॥ ६९ ॥ कोटिसूर्यप्रतीकाशःकोटिचंद्रांशुनिर्मलः ॥
शिवाभवाध्युष्टकोटिविनायकधुरंधरः ॥ ७० ॥ सप्तकोटिमहामंत्रमंत्रितावय
यवद्युतिः ॥ त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ ७१ ॥ अनंतनामानं
तश्रीरनंतानंतसौख्यदः ॥ इतिवैनायकंनाम्नांसहस्रमिदमीरितं ॥ ७२ ॥ इदं
ब्राह्मेमुहूर्तेयःपठतिप्रत्यहंनरः ॥ करस्थंतस्यसकलमैहिकामुष्मिकंसु ॥ग॰न॰॥ ॥१३॥
खं ॥ ७३ ॥ आयुरारोग्यमैश्वर्यंधैर्यंशौर्यंबलंयशः ॥ मेधाप्रज्ञाधृतिःकां
तिःसौभाग्यमतिरूपता ॥ ७४ ॥ सत्यंदयाक्षमाशांतिर्दाक्षिण्यंधर्मशीलता ॥

(15)

॥ग॰स॰॥ ॥९४॥ संग्रामरंगेसर्वेषामिदमेकंजयावहं॥सर्ववंध्यात्वदोषघ्नंगर्भरक्षैककारणं॥८३॥
पठ्यतेप्रत्यहंयत्रस्तोत्रंगणपतेरिदं॥देशेतत्रनदुर्भिक्षंमितयोदुरितानिच॥
॥८४॥नतद्गेहंजहातिश्रीर्यत्रायंपठ्यतेस्तवः॥क्षयकुष्टप्रमेहार्शोभगंदर
विषूचिकाः॥८५॥गुल्मंप्लीहानमश्मानमतिसारंमहोदरं॥कासंश्वासमु
दावर्तंशूललंशोफादिसंभवं॥८६॥शिरोरोगंवमींहिक्कांगंडमालामरोच
कं॥वातपित्तकफद्वंद्वत्रिदोषजनितज्वरं॥८७॥आगंतुविषमंशीतमुष्ण
चैकाहिकादिकं॥इत्याद्युक्तमनुक्तंवारोगंदोषादिसंभवं॥८८॥सर्वंप्रश ॥ग॰न॰॥
मयत्याशुस्तोत्रस्यास्यसकृज्जपः॥सकृत्पाठेनसंसिद्धःस्त्रीशूद्रपतितै ॥९४॥
रपि॥८९॥सहस्रनाममंत्रोयंजपितव्यःशुभाप्तये॥महागणपतेःस्तोत्रं

(16)

॥ग०स०॥ वैनायकेधाम्निरमतेनित्यनिर्वृतः॥योनामभिर्द्धुनेदैवैरर्चयेत्सजयेन्नरः॥
॥१५॥ ॥१८॥राजानोवश्यतांयांतिरिपवोयांतिदासतां॥मंत्राःसिध्यंतिसर्वेपिसुल
भास्तस्यसिद्धयः॥१९॥मूलमंत्रादपिस्तोत्रमिदंप्रियतरंमम॥नभस्येमासि
शुक्लायांचतुर्थ्यांममजन्मनि॥२००॥दूर्वाभिर्नामभिःपूजांतर्प्पणंविधिव
च्चरेत्॥अष्टद्रव्यैर्विशेषेणजुहुयाद्भक्तिसंयुतः॥१॥तस्येप्सितानिसर्वा
णिसिध्यंतत्रनसंशयः॥इदंप्रजप्तंसंपठितंपाठितंश्रावितंश्रुतं॥२॥व्याकृतं
चर्चितंध्यातंविमृष्टमभिनंदितं॥३॥मत्रचसर्वेषांविश्वैश्वर्यप्रदायकं
३॥स्वच्छंदचारिणाप्येषयेनायंधार्यतेस्तवः॥सरक्ष्यतेशिवोद्भूतैर्गणैरष्ट ॥ग०न०॥ ॥१५॥
ष्टकोटिभिः॥४॥पुस्तकेलिखितंयत्रगृहेस्तोत्रंप्रपूजयेत्॥तत्रसर्वोत्तमा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai

||ग०स०|| कलत्रंगुणवदभिमतंयथेदंतस्त्वसत्यंनित्यंयः स्तोत्रमेतत्पठतिगणप
||१६|| तिस्तस्यहस्तेसमस्तं ||१०|| गणंजयोगणपतिर्हेरंबोधरणीधरः महाग
णपतिर्लक्षप्रदःक्षिप्रप्रसादनः ||११|| अमोघसिद्धिरमृतोमंत्रश्चिंता
मणिर्निधिः सुमंगलोबीजमाशापूरकोवरदःशिवः ||१२|| काश्यपो
नंदनोवाचासिद्धोढुंढीविनायकः मोदकैरेभिरत्रैकविंशत्यानामभिः
२ पुमान् ||१३|| यस्तौ। तिमद्गतमनामदाराधनतत्परः स्तुतोनाम्नासहस्रे ||ग०न०||
णतेनाहंनात्रसंशयः ||१४|| नमोनमः सुरवरपूजितांघ्रये नमोन ||१६||
मोनिरुपममंगलात्मने ||नमोनमोविपुलपदैकसिद्धये नमोनमः||

॥ग॰स॰॥
॥१७॥

18

॥श्रीमहागणपतिसहस्रनामस्तोत्रं समाप्तं॥

॥ग॰न॰॥
॥१७॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com